जीवः, [1]उपजीवी[A]-अनुजीवी, [2]जीवकः-[B]-जीवका, [3]जीवञ्जीवकः, जीवः, [C]जिजीविषुः, जेजीवः ;

जीवितव्यम्, जीवयितव्यम्, जिजीविषितव्यम्, जेजीवितव्यम् ;

जीवनीयम्, जीवनीयम्, जिजीविषणीयम्, जेजीवनीयम् ;

जीव्यम्, जीव्यम्, जिजीविष्यम्, जेजीव्यम् ;

ईषज्जीवः-दुर्जीवः-सुजीवः ; — —

जीव्यमानः, जीव्यमानः, जिजीविष्यमाणः, जेजीव्यमानः ;

जीवः, जीवः, जिजीविषः, जेजीवः ;

जीवितुम्, जीवयितुम्, जिजीविषितुम्, जेजीवितुम् ;

ज्यूतिः, [4]अजीवनिः[D], [5]जीविका, जीवना, जिजीविषा, जेजीवा ;

[E]जीवनम्, जीवनम्, जिजीविषणम्, जेजीवमम् ;

जीवित्वा, जीवयित्वा, जिजीविषित्वा, जेजीवित्वा ;

सञ्जीव्य, सञ्जीव्य, सञ्जिजीविष्य, सञ्जेजीव्य ;

[6]यावज्जीवम् [ अग्निहोत्रं जुहुयात् ],

जीवम् २, जीवित्वा २, } जीवम् २, जीवयित्वा २, } जिजीविषम् २, जिजीविषित्वा २, } जेजीवम् २ ; जेजीवित्वा २ ; }

---

1. 'सुप्यजातौ—' (3-2-78) इति ताच्छील्ये णिनिः ।

2. 'आशिषि च' (3-1-150) इति वुन् । जीवतात् **जीवकः** । स्त्रियाम्, 'प्रत्ययस्थात्—' (7-3-44) इति प्राप्तस्येत्वस्य 'आशिषि वुनश्च न' (वा. 7-3-45) इति निषेधः ।

3. 'गमश्च' (3-2-47) इत्यत्र "चकारात् **जीवञ्जीवक**-शिवङ्कर-शुभङ्करादयः साधवः ।" इति **बृ. शेखरे** ।

4. 'आक्रोशे नञ्यनिः' (3-3-112) इति अनिप्रत्ययः ।

5. स्त्रियां भावादौ 'संज्ञायाम्' (3-3-109) इति ण्वुल् ।

6. 'यावति विन्दजीवोः' (3-4-30) इति णमुल् ।

A. 'भीमकान्तैर्नृपगुणैः स बभूवोप**जीविनाम्** ।' **रघुवंशे** 1-16.

B. 'बन्धुना विगृहीतोऽहं भूयासं **जीवकः** कथम् ॥' भ. का. 6.87.

C. 'तमुद्यतनिशातासिं प्रत्युवाच **जिजीविषुः** ।' भ. का. 5.46.

D. 'अभावे भवतां योऽस्मिन् **जीवेत्** तस्यास्त्व**जीवनिः** ।' भ. का. 7.77.

E. 'सञ्चारनिष्ठ्यूतनखेन्दुचन्द्रिकं लोके जयन्तं सकलैक**जीवनम्** ।' धा. का. 1.72.